Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 3 | ISSN : 2581- 6306

# काव्यप्रयोजनविमर्श:

आयुष दीक्षित
शोधच्छात्र:, केन्द्रीय संस्कृत विश्वविद्यालय:, भोपाल परिसर:।

**Article Info**
Volume 5, Issue 3
Page Number : 124-127
**Publication Issue :**
May-June-2022
**Article History**
Accepted : 01 May 2022
Published : 30 May 2022

**शोधसारांश:-** काव्यप्रयोजनान्येतानि प्रमुखप्राचीनसाहित्यकारै: उपस्थापितानि। अत्र केचिद् कविसम्बद्धप्रयोजनव्यवस्थां विधास्यन्ति, केचित्तु सामाजिकाय प्रयोजनमुपस्थापयन्ति। केचित्तूभयत्र प्रयोजनव्यवस्थां कुर्वन्ति। अनुशीलनेनानेन ज्ञायते यत् प्रधानरुपेण आनन्दप्राप्ति: एव प्राचीनालङ्कारशास्त्रिषु काव्यप्रयोजनं, चतुर्वर्गफलप्राप्तिस्तु अस्ति।

**मुख्यशब्दा:-** काव्यम्, प्रयोजनम्, भरतमुनि:, भामह:, आचार्यवामन:, यशप्राप्ति:, धनप्राप्ति:, व्यवहारज्ञानम्।

भारतीयवाङ्मयविचार: अतीव गभीर: विस्तृतश्च। तत्रापि बहुषां विषयानामुपस्थापनं जायते। तेष्वेवास्ति प्रयोजनस्य निर्णय:। सत्यमेव उच्यते यत् प्रयोजनमनुदिश्य मन्दोऽपि न प्रवर्ततेति। भारतीयवाङ्मयविचारे अलङ्कारशास्त्रपरम्परायां बहुभिराचार्यै: काव्यप्रयोजननानां स्थापनं कृतम्। प्रसिद्धमेव यत्–

**सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते।**
**शास्त्रादौ तेन वक्तव्यमं सम्बन्ध: सप्रयोजनम्॥**

आप्राचीनकालाद् इदानीं पर्यन्तं काव्यप्रयोजननानि अस्माभि: दृष्टुं शक्यते।

**भरतमुनि**:-नाट्यशास्त्रकारेण भरतमुनिना प्रयोजनानि निगदितानि, भरतमुने: काले काव्यनाटकयोर्मध्ये न कश्चित् भेद: आसीत्, नाट्यमपि दृश्यकाव्यत्वात् काव्यकोटौ अन्तर्भवति। नाट्यशास्त्रे नाट्यप्रयोजनानामुल्लेखो वर्तते, ये च काव्यप्रयोजनान्यपि भवितुमर्हन्ति।

**“दु:खार्तानां श्रमार्त्तानां शोकार्त्तानां तपस्विनां।**
**विश्रांतिजननं काले नाट्यभेतद् भविष्यति॥**
**धर्म्य यशस्य मायुष्यं हितं बुद्धिविवर्धनम्।**
**लोकोपदेशजननं नाट्यमेतद् भविष्यति ॥**[1]

नाट्यशास्त्रं दु:खश्रमपीड़ितेभ्य: शोकसन्तप्तेभ्य: तपस्विभ्यश्च सुखप्राप्तिसाधनं विश्रान्तिदायकञ्च भविष्यति। धर्मकरं यशकरम् आयुप्रदायकं लोकोपदेशजनकञ्च इदं नाट्यं भविष्यतीति।

**भामह:**-भामह: काव्यालङ्कारेति ग्रन्थे आधारद्वयमाध्यमेन काव्यप्रयोजनम् उपस्थापयति। कविपाठकौ आधारौ मत्वा प्रथमं, केवलं कविमाधारं मत्वा च द्वितीयं।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**"धर्मार्थ काममोक्षेषु वैचक्षण्यं कलासु च।**

**करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ।।[2]**

साधुकाव्यस्य अनुशीलनेन निबन्धनेन वा पुरुषार्थचतुष्टयानां प्राप्तिर्जायते एव, कलासु अपि वैलक्षण्यमाविर्भवति। कविपाठकयो: विषये एतावत् प्रतिभाति। अनन्तरम् द्वितीयायां पंक्तौ तु प्रतीयते यत् कवि: कीर्तिं प्रीतिं च सत्काव्यस्य निबन्धनेन प्राप्नोति, अत: काव्यकर्तु: पक्षे इयं पंक्ति: वर्तते।

**दण्डी-** काव्यादर्शे आचार्यदण्डिना वाणीमाहात्म्यं स्थापितम्। उक्तं यत् त्रिष्वेव भुवनेषु शब्देनैव ज्ञानस्य प्रकाश: दीयते। कवीनां यशसिद्धिम् एवं राजादीनामपि यशसिद्धिं करोति।

**इदमंधं तम: कृतस्वं जाएत भुवनत्रयम्।**

**यदि शब्दाहव्यं ज्योतिरा संसाराद्ध दीप्यते।**

**आदिराजयशोबिम्ब आदर्श प्राप्य वाङ्मयम्।**

**तेषायसन्निधरानेऽपि न स्वयं पश्य नश्यति।[3]**

**आचार्यवामन:-** वामनानुसारेण काव्यप्रयोजनं दृष्टादृष्टेति भेदाभ्यां द्विधा भवितुमर्हति। आद्या तावत् प्रीति, इत्युक्ते आनन्दानुभव:, यद्दृष्टप्रयोजनमस्ति। अन्या च कीर्ति:, इत्युक्ते यश: यद् अदृष्टप्रयोजनमस्ति। अत्र उभौ भेदौ कविदृष्ट्या प्रतीयेते।

**काव्य सद्दृष्टादृष्टार्थ प्रीति कीर्ति हेतुत्वात्।[4]**

कीर्तिरदृष्टप्रयोजनमित्यनेन एवम् अनुमातुं शक्यते यत् मृत्योरनन्तरमपि कवे: कीर्ति: लोकेऽस्मिन् काव्यरूपेण स्थीयते।

**रुद्रट:-** रुद्रटामतानुसारेण चतुर्वर्गाणां प्राप्ति: काव्यप्रयोजनमस्ति।

**ननु काव्येन क्रियते सरसानामवगमश्चतुर्वर्गे।**

**लघु मृदु चनीरसेभ्यस्ते हि त्रस्यन्ति शास्त्रेभ्य:।।[5]**

काव्येन रसिका: आपातत: धर्मार्थकाममोक्षेषु प्रवीणा: भवन्ति। यत: रसिका: नीरसेभ्य: शास्त्रेभ्य: भयापन्ना: भवन्ति।

**भोजराज:-**काव्यरचनाया: प्रयोजनम् यशानन्दयो: प्राप्ति: इति भोजराज:। दोषरहितं गुणसहितम् अलङ्कारैरलङ्कृतं रसान्वितं च काव्यं य: कवि: करोति, स: कीर्तिभाज: प्रीतिभाजश्च भवति।

**निर्दोषंगुणवत्काव्यमलङ्कारैरलङ्कृतम्।**

**रसान्वितम् कवि: कुर्वन् कीर्ति प्रीतिं च विन्दति।।[6]**

**रामचन्द्र-गुणचन्द्र: –** नाट्यदर्पण इति ग्रन्थे अनेन काव्यं चतुर्वगसाधनं इत्युक्तम्, तत्रोक्तं यत् प्रधानफलरूपेण तु धर्मार्थकामा: एव तिष्ठन्ति। मोक्षं तु धर्मत्वाज्जायते अत: मोक्षम् अप्रधानफलम् अस्ति।–

**धर्म-काम-अर्था: व्यस्तसमस्ता सत् प्रधान फलं यत्र।**

**मोक्षस्तु धर्म कार्यत्वात् गौणम् फलम्।।[7]**

**आचार्य आनन्दवर्द्धन:**– सहृदयमन:प्रीति: काव्यप्रयोजनम् इति ध्वन्यालोककारेणानन्दवर्धनेन उपदिष्टम्।

**काव्यस्यात्माध्वनिरिति बुधैर्यः समाम्नात् पूर्वस्**

**तस्याभावः जगदुरपरे भाक्तमाहुस्तमन्ये।**

**केचिद्वाचामस्थितमवषये तत्वमुचूस्तदीयं**

**"तेन ब्रूनः सहृदयमनः प्रीतये तत्स्वरूपम् ।।"**[8]

**आचार्य कुन्तकः –** श्रमविवर्जितेभ्यः अभिजातकुलोत्पन्नेभ्योऽपि, अल्पधीभ्योऽपि काव्यं आनन्दयति इति वक्रोक्तिजीवितकारेणोक्तम्। धर्मस्य साधनोपाययोग्यं काव्यबन्धः इति। तद्यथा–

**"धर्मादि साधनोपायः सुकुमार क्रमोदितः ।**

**काव्यबंधोऽभिजातानां हृदयाह्लाद कारकः ।**

**व्यवहारपरिस्पन्द सौन्दर्यं व्यवहारिभिः ।**

**सत्काव्यव्याधिगमादेव नूतनौचित्यमाप्यते ।**

**चतुर्वर्गफलास्वाद मप्यतिक्रम्य तद्विदाम्**

**काव्यामृतरसेनान्तश्चमत्कारो वितन्यते।।**[9]

चतुर्वर्गात् अपि अधिकं काव्यस्य रसः सहृदयानां हृदयेषु चमत्कारमातनोति। सत्काव्यस्याधिगमात् एव औचित्यम् आप्यते।

**मम्मटः-** मम्मटकृत काव्यप्रयोजनं सुप्रसिद्धमेव, यशप्राप्तिः, धनप्राप्तिः, व्यवहारज्ञानम्, अनिष्टनिवारणं, सद्यः अलौकिकानन्दावाप्तिः, कान्तावत् मधुरोपदेशश्च षड्प्रयोजनान्यनेन उक्तानि।

**"काव्य यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**

**सद्यः परिनिर्वृत्तये कान्तासम्मिततयोपदेशयुजे।**[10]

**विश्वनाथः-** विश्वनाथेनापि कविराजेन साहित्यदर्पणे काव्यप्रयोजननानां व्यवस्था विहिता। उच्यते यत् काव्येन न केवलं सुधीभ्योः चतुर्वर्गफलप्राप्तिर्जायते, अपितु अल्पधीष्वपि सुखात् काव्यादेव चतुर्वर्गफलप्राप्तिः जायते।

**चतुर्वर्गफल प्राप्तिः सुखादल्पधियामपि ।**

**काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते।।**[11]

**पण्डितराजजगन्नाथः**– पण्डितराजजगन्नाथेन रसगङ्गाधरे उक्तं यत्–

**तत्र कीर्तिपरमाह्लादगुरुराजदेवताप्रसादाद्यनेकप्रयोजनकस्य काव्यस्य।**[12]

काव्यप्रयोजनान्येतानि प्रमुखप्राचीनसाहित्यकारैः उपस्थापितानि। अत्र केचिद् कविसम्बद्धप्रयोजनव्यवस्थां विधास्यन्ति, केचित्तु सामाजिकाय प्रयोजनमुपस्थापयन्ति। केचित्तूभयत्र प्रयोजनव्यवस्थां कुर्वन्ति। अनुशीलनेनानेन ज्ञायते यत् प्रधानरुपेण आनन्दप्राप्तिः एव प्राचीनालङ्कारशास्त्रिषु काव्यप्रयोजनं, चतुर्वर्गफलप्राप्तिस्तु अस्ति एव।

सन्दर्भ

1. नाट्यशास्त्र : 1.113-15

2. काव्यालंकारः 1.12

3. काव्यादर्शः प्रथम परिच्छेद 1/4

4. काव्यालंकारसूत्रवृत्तिः 1/3
5. काव्यालंकार : 12.1
6. सरस्वतीकण्ठाभरण :1.2
7. नाट्यदर्पणः 1.5
8. ध्वन्यालोक : 1−16
9. वक्रोक्ति जीवितम् 1.3−5
10. काव्यप्रकाश : 1.2
11. साहित्यदर्पण : 1.2
12.रसगंगाधरः प्रथम आनन पृष्ठ 9